# Skandaproktam Shivalingavijnanopadesham

# સ્કન્દપ્રોક્તં શિવલિઙ્ગવિજ્ઞાનોપદેશમ્

## Document Information

Text title : Skandaproktam Shivalingavijnanopadesham

File name : skandaproktaMshivalingavijnAnopadesham.itx

Category : shiva, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshvarAkhyaH dashamAMshaH | adhyAyaH 41 | 5.2-15.1||

Latest update : September 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 10, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવલિઙ્ગવિજ્ઞાનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઈશ્વરાખ્યે)

- જૈગીષવ્યસ્કન્દસંવાદે -

સ્કન્દ ઉવાચ ।
અથ તે સમ્પ્રવક્ષ્યામિ શિવલિઙ્ગં સમાસતઃ ॥ ૫.૨॥

યસ્ય વિજ્ઞાનમાત્રેણ વિમુક્તો માનવો ભવેત્ ।
લયનાત્સર્વજગતાં લિઙ્ગમિત્યુચ્યતે મુને ॥ ૬॥

શિવશ્ચેતનરૂપો હિ જડં જગદિતિ સ્થિતમ્ ।
તેન ચૈતન્યરૂપેણ જડમેતત્પ્રકાશતે ॥ ૭॥

શિવો નૈવ જડઃ સાક્ષાત્ સ્વપ્રકાશૈકલક્ષણઃ ।
અતઃ સાક્ષી શિવઃ સાક્ષાત્ સ્વે ધામ્નિ સમવસ્થિતઃ ॥ ૮॥

સ્વયઞ્જ્યોતિર્મહાદેવો હ્યલિઙ્ગો લિઙ્ગસઙ્ગતઃ ।
તસ્ય ભાસા જગદ્ભાતિ જગજ્જડમિદં મુને ॥ ૯॥

અલિઙ્ગસ્યાપિ દેવસ્ય લિઙ્ગં શ્રુતિશિરોગતમ્ ।
યોગિધ્યેયમિદં લિઙ્ગં શમ્ભોર્નિગમચોદિતમ્ ॥ ૧૦॥

આગમોક્તાનિ લિઙ્ગાનિ ભૌતિકાનિ મુનીશ્વર ।
અયોગી ભૌતિકે લિઙ્ગે યોગી સર્વત્ર ભાવયેત્ ॥ ૧૧॥

સર્વાવભાસકો દેવો યથા હૃદિ વિરાજતે ।
તથા સર્વગતઃ શમ્ભુઃ દેશદિક્કાલવર્જિતઃ ॥ ૧૨॥

લિઙ્ગે સમ્પૂજિતો વિપ્રૈર્ભુક્તિં મુક્તિં પ્રયચ્છતિ ।
અલિઙ્ગોઽપિ મહાદેવઃ શિવલિઙ્ગે સમર્ચિતઃ ॥ ૧૩॥

ભસ્મત્રિપુણ્ડ્રરુદ્રાક્ષધારકેણાર્ચિતં યદિ ।
લિઙ્ગં શમ્ભોર્મુક્તિદાયિ બિલ્વપત્રાક્ષતાર્ચિતમ્ ॥ ૧૪॥

ભૌતિકેષ્વપિ લિઙ્ગેષુ પૂજનીયો મહેશ્વરઃ । ૧૫.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવલિઙ્ગવિજ્ઞાનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશ્વરાખ્યઃ દશમાંશઃ । અધ્યાયઃ ૪૧ લિઙ્ગોદ્ભવઃ । ૫.૨-૧૫.૧॥

- .. shrIshivarahasyam . IshvarAkhyaH dashamAMshaH . adhyAyaH 41 li NgodbhavaH . 5.2-15.1..

Notes:
Skanda સ્કન્દ briefs to Jaigīṣavya જૈગીષવ્ય about the Way of Worshipping Śiva શિવ via the Śivaliṅga શિવલિઙ્ગ.

Proofread by Ruma Dewan

*Skandaproktam Shivalingavijnanopadesham*
pdf was typeset on September 10, 2024

Please send corrections to *sanskrit@cheerful.com*